## हिमकाषिहतिषु च । (८४/९९२)

हिम काषिन् हति इत्येतेषु पादशब्दस्य पद् इत्ययमादेशो भवति । हिम – पद्धिमम् । काषिन् – अथ पत्काषिणो यान्ति । हति – पद्धतिः ॥

## ऋचः शे । (८५/९९३)

ऋक्सम्बन्धिनः पादशब्दस्य शे परतः पद् इत्ययमादेशो भवति । पच्छो गायत्रीं शंसति । पादं पादं शंसति इति 'सङ्ख्यैकवचनाच्च वीप्सायाम्' (५.४.४३/२११०) इति शस् प्रत्ययः । ऋचः इति किम् ? पादशः कार्षापणं ददाति [1]इति ॥

## वा घोषमिश्रशब्देषु । (८६/९९४)

घोष मिश्र शब्द इत्येतेषु चोत्तरपदेषु पादस्य वा पद् इत्ययमादेशो भवति । पद्घोषः, पादघोषः । पन्मिश्रः, पादमिश्रः । पच्छब्दः, पादशब्दः ।

[७४१] निष्के चेति वक्तव्यम् । (म.भा. ३.१६३)

पन्निष्कः, पादनिष्कः ॥

## उदकस्योदः सञ्ज्ञायाम् । (८७/९९५)

उदकशब्दस्य सञ्ज्ञायां विषये उद इत्ययमादेशो भवति उत्तरपदे परतः । उदमेघो नाम यस्य औदमेघिः पुत्रः । उदवाहो नाम यस्य औदवाहिः पुत्रः । सञ्ज्ञायाम् इति किम् ? उदकगिरिः ।

[७४२] सञ्ज्ञायामुत्तरपदस्योदकशब्दस्योदादेशो भवतीति वक्तव्यम् । (म.भा. ३.१६३)

लोहितोदः । नीलोदः । क्षीरोदः ॥

## पेषंवासवाहनधिषु च । (८८/९९६)

पेषं वास वाहन धि इत्येतेषु चोत्तरपदेषु उदकस्य उद इत्ययमादेशो भवति । उदपेषं पिनष्टि । 'स्नेहने पिषः' (३.४.३८/३३५९) इति णमुल् । वास – उदकस्य वासः उदवासः । वाहन – उदकस्य वाहनः उदवाहनः । उदकं धीयतेऽस्मिन् इति उदधिः ॥

## एकहलादौ पूरयितव्येऽन्यतरस्याम् । (८९/९९७)

उदकस्योद इति वर्तते । एकः, असहायः तुल्यजातीयेनानन्तरेण हलादिना, हल् आदिर्यस्यो[2]त्तरपदस्य तदेकहलादिः, तस्मिन्नेकहलादौ पूरयितव्यवाचिन्यन्यतरस्याम् उदकस्य उद इत्ययमादेशो भवति । उदकुम्भः, उदककुम्भः । उदपात्रम्, उदकपात्रम् । एकहलादौ इति किम् ? [3]उदकस्थालम् । पूरयितव्ये इति किम् ? उदकपर्वतः ॥

---

1. इति नास्ति फ. 2. उत्तरपदस्य नास्ति फ, उत्तरस्य क. 3. उदकस्थाली फ.ह.ड.